Roll No. ..................

# 933

## कक्षा 9वीं वार्षिक परीक्षा, 2023-24

[512]

# SANSKRIT
# संस्कृत

[Total No. of Questions: 23] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 75]

*निर्देशाः –*

*(1) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(2) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

*(3) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।*

प्र.1 उचितं विकल्पं चित्वा लिखत – (6×1=6)

(i) 'इदानीम् अहं संस्कृतं पठामि।' इत्यस्मिन् वाक्ये अव्ययपदम् –

(अ) अहम् (ब) संस्कृतम्

(स) इदानीम् (द) पठामि

(ii) 'कच्छपः शनैः शनैः चलति।' अस्मिन् वाक्ये अव्ययपदम् अस्ति –

(अ) कच्छपः (ब) शनैः शनैः

(स) चलति (द) कोऽपि न

(iii) 'आस्वाद्यतोयाः नद्यः' अनयोः पदयोः विशेषणपदम् अस्ति –

(अ) आस्वाद्यतोयाः (ब) नद्यः

(स) उभौ (द) कोऽपि न

(iv) 'स्वादून् भक्ष्यकवलान् दास्यामि' अस्मिन् वाक्ये विशेष्य पदम् अस्ति –

(अ) स्वादून् (ब) भक्ष्यकवलान्

(स) दास्यामि (द) सर्वे

(v) 'निर्गच्छति' इति पदे उपसर्गः अस्ति –

(अ) गच्छति (ब) नि

(स) निस् (द) निर्

(vi) 'विज्ञातुम्' पदे उपसर्गः अस्ति –

(अ) ज्ञा (ब) तुमुन्

(स) वि (द) ज्ञातुम्

प्र.2 रिक्तस्थानानि पूरयत – (6X1=6)

(i) 'बालकाय' इति रूपं............................................................विभक्तेः अस्ति।

(ii) 'लता' शब्दस्य सप्तमी विभक्तेः द्विवचनस्य..........................रूपं भवति।

(iii) 'फल' शब्दस्य द्वितीया विभक्तेः बहुवचनस्य रूपं........................भवति।

(iv) 'वयम्' इति.............................................................वचनस्य रूपमस्ति।

(v) 'सरस्वती' इति पदस्य पर्याय पदं............................................अस्ति।

(vi) 'पवनः' इत्यस्य पदस्य पर्याय पदं............................................अस्ति।

प्र.3 शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (6X1=6)

(i) 'मातापितरौ' इति द्वन्द्वसमासस्य उदाहरणम् अस्ति।

(ii) 'त्रिलोकी' पदस्य विग्रहः – त्रयाणां लोकानां समाहारः अस्ति।

(iii) 'गुरूगृहम्' पदे अव्ययीभाव समासः अस्ति।

(iv) 'दोग्धुम्' इति पदे 'क्त्वा' प्रत्ययः अस्ति।

(v) 'आगत्य' इति पदे 'ल्यप्' प्रत्ययः अस्ति।

(vi) 'वक्तव्यम्' इदं 'तव्यत्' प्रत्ययस्य उदाहरणम् अस्ति।

प्र.4 युग्ममेलनं कुरुत – (6×1=6)

| (क) – स्तम्भः | | (ख) – स्तम्भः |
|---|---|---|
| पठामि | – | अणिष्ठः |
| प्राचीनम् | – | लङ् लकारः |
| अहसन् | – | एकवचनम् |
| गरिष्ठः | – | गम् |
| गच्छति | – | मध्यमपुरुषः |
| लेखिष्यथः | – | नवीनम् |

प्र.5 एकपदेन उत्तरं लिखत – (6×1=6)

(i) 'हितोपदेशः' इति पदे कः सन्धिः?

(ii) 'स्नानार्थम्' पदस्य सन्धि विच्छेदं कृत्वा लिखत।

(iii) 'प्रति + एकम्' इति पदस्य सन्धिपदं लिखत।

(iv) विवदमानौ तौ द्वावपि कुत्र गतौ?

(v) खगोत्तमः कीदृशीं गिरं व्याजहार?

(vi) गीतिं कथं गातुं कथयति?

**अधोलिखित प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत –**

प्र.6 सरोवराणां हानिः कदा भवति? (2)

**अथवा**

अनधीतः तपोदत्तः कैः गर्हितोऽभवत्?

प्र.7 कविः वाणीं किं कथयति? (2)

**अथवा**

प्रकृतेः प्रमुखानि तत्वानि कानि सन्ति?

प्र.8 पतगेश्वरः रावणस्य कीदृशं चापं सशरं बभञ्ज? (2)

**अथवा**

मानवानां चेतांसि कीदृशानि भवन्ति?

(2)

प्र.9 तपोदत्तः पुरुषस्य कां चेष्टां दृष्ट्वा अहसत्?

<u>अथवा</u>

जीर्णधनः गिरिगुहाद्वारं कया पिधाय गृहमागतः? (2)

प्र.10 बालस्य मित्राणि किमर्थं त्वरमाणा अभवन्?

<u>अथवा</u>

निर्धनायाः दुहिता मञ्जूषायां कानि अपश्यत्? (2)

प्र.11 स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत – (केचित् द्वे)

(i) मल्लिका स्वपतिं <u>चतुरतमं</u> मन्यते?

(ii) चटकः <u>स्वकर्मणि</u> व्यग्रः आसीत्?

(iii) पर्यावरणरक्षणं <u>धर्मस्य</u> अङ्गम् अस्ति?

प्र.12 अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति लिखत – (कोऽपि द्वौ) (2)

(i) हा विधे! किमिदं मया कृतम्? ................कः................कं प्रति

(ii) तण्डुलान् मा भक्षय। ................कः................कं प्रति

(iii) धन्यवाद मातुल! याम्यधुना। ................कः................कं प्रति

प्र.13 वाच्य परिवर्तनं कुरुत – (केचित् द्वौ) (2)

(i) बालः पाठं पठति। (कर्मवाच्ये)

(ii) बालकेन विद्यालयः गम्यते। (कर्तृवाच्ये)

(iii) रामः फलं खादति। (कर्मवाच्ये)

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् श्लोकमेकं लिखत – (2)

प्र.15 अधोलिखित वाक्यानि शुद्धं कुरुत – (केचित् द्वे) (2)

(i) बालिका <u>विद्यालयः</u> गच्छति।

(ii) <u>रामं</u> नमः।

(iii) छात्राः पाठं <u>पठति</u>।

प्र.16 प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत – (केचित् चत्वारि) (4×½=2)

(क्लेशात्, रक्षितः, अन्नमयं, गुणाः, विलपन्ती, पर्वतात्)

(i) मनः..........................................................भवति।

(ii) नद्यः..........................................................निस्सरन्ति।

(iii) ईश्वरः..........................................................त्रायते।

(iv) धर्मो रक्षति.......................................................।

(v) गुणाः गुणज्ञेषु.................................................भवन्ति।

(vi) सा तदा करुणा वाचो..........................सु दुःखिता।

प्र.17 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत – (4×½=2)

(क) चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति।

(ख) उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः।

(ग) मल्लिका पूजार्थं मोदकानि रचयति।

(घ) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं गच्छति।

प्र.18 अधोलिखितयोः गद्यांशयोः गद्यांशमेकस्य प्रश्नानां उत्तराणि संस्कृतभाषायां लिखत – (3)

(क) स्वार्थान्धो मानवः तदेव पर्यावरणम् अद्य नाशयति। स्वल्पलाभाय जनाः बहुमूल्यानि वस्तूनि नाशयन्ति। जनाः यन्त्रागाराणां विषाक्तं जलं नद्यां निपातयन्ति। तेन मत्स्यादीनां जलचराणां च क्षणेनैव नाशो भवति। नदीजलमपि तत्सर्वधाऽपेयं जायते। मानवाः व्यापारवर्धनाय वनवृक्षान् निर्विवेकं छिन्दन्ति।

**प्रश्नाः –**

(i) कीदृशः मानवः पर्यावरणं नाशयति?

(ii) मानवाः कस्मै वनवृक्षान् छिन्दन्ति?

(iii) स्वल्पलाभाय जनाः कानि नाशयन्ति?

अथवा

(ख) ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत् तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा स्वर्णकाकस्य रहस्यं ज्ञातवती। सूर्यातपे तण्डुलान् निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत्। प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत्–"भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ।"

प्रश्नाः –

(i) स्वर्णकाकस्य रहस्यम् का ज्ञातवती?

(ii) भो नीचकाक! इति का प्रावोचत्?

(iii) लुब्धा वृद्धा स्वसुतां किमर्थं नियुक्ता?

प्र.19 अधोलिखितपद्यांशयोः पठित्वा पद्यांशमेकस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – **(3)**

(क) रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।

विदधद् बालुकाभिस्तं यासि त्वमतिरामताम्।।

प्रश्नाः –

(i) मकरालये कः सेतुं बबन्ध?

(ii) रामः काभिः सेतुनिर्माणं कृतवान्?

(iii) 'बालुका' इति पदस्य पर्याय पदं लिखत।

अथवा

(ख) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।

प्रश्नाः –

(i) प्रियवाक्यप्रदानेन के तुष्यन्ति?

(ii) कुत्र दरिद्रता न भवेत्?

(iii) वचने का न भवेत्?

प्र.20 अधोलिखितयोः नाट्यांशयोः पठित्वा नाट्यांशमेकस्य प्रश्नानां उत्तराणि संस्कृतभाषाया लिखत – (3)

(क) श्वेतकेतुः – भगवन्! ज्ञातुम् इच्छामि यत् किमिदं मनः?

आरुणिः – वत्स! अशितस्यान्नस्य योऽणिष्ठः तन्मनः।

श्वेतकेतुः – कश्च प्राणः?

आरुणिः – पीतानाम् अपां योऽणिष्ठः स प्राणः।

श्वेतकेतुः – भगवन्! का इयं वाक्?

आरुणिः – वत्स! अशितस्य तेजसो योऽणिष्ठः सा वाक्!

मनः अन्नमयं, प्राणः आपोमयः, वाक् च तेजोमयी भवति इत्यप्यवधार्यम्।

प्रश्नाः –

(i) तेजोमयी का भवति?

(ii) पीतानाम् कीदृशः भागः प्राणः?

(iii) 'वाक्' विषये कः पृच्छति?

<u>अथवा</u>

(ख) मल्लिका – अहं स्वसखीभिः सह श्वः प्रातः काशीविश्वनाथमन्दिरं गमिष्यामि। तत्र गङ्गास्नानं धर्मयात्राञ्च वयं करिष्यामः।

चन्दनः – सखिभिः सह! न मया सह! (विषादं नाटयति)

मल्लिका – आम्। चम्पा, गौरी, माया, मोहिनी, कपिलादयः सर्वाः गच्छन्ति। अतः मया सह तवागमनस्य औचित्यं नास्ति।

प्रश्नाः –

(i) मल्लिका काभिः सह मन्दिरं गमिष्यति?

(ii) मल्लिकया सह का का गच्छन्ति?

(iii) मल्लिका पूजार्थं कदा, कुत्र गच्छति?

प्र.21 अधोलिखित अपठित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (4)

अस्माकं देशस्य नाम 'भारतवर्षम्' इति अस्ति। पुरा अस्माकं देशे भरतनामा दुष्यन्तपुत्र महाप्रतापी राजा बभूव। तस्य एवं सम्बन्धात् अस्य देशस्य नाम अपि 'भारतम्' इति प्रसिद्धम्। अस्मदीयः देशः प्रकृति सम्पन्नः अस्ति। अत्र षड् ऋतवः यथासमयं आगत्य भारतं विविधाभिः सुषमाभिः भूषयन्ति। अस्माकं देशः विश्वगुरूः आसीत्। 'भारतवर्षम्' अनेकेषां भाषा–देश–धर्म संस्कृति–परम्पराणां देशः अस्ति।

**प्रश्नाः –**

(क) 'भारतवर्षम्' कीदृशः देशः अस्ति?

(ख) विश्वगुरूः कः आसीत्?

(ग) कस्य सम्बन्धात् अस्य देशस्य नाम 'भारतम्' प्रसिद्धम् अभवत्?

(घ) षड् ऋतवः भारतं काभिः भूषयन्ति?

प्र.22 स्वप्राचार्याय शिरोवेदना कारणेन दिनत्रयस्य अवकाशं प्रार्थना पत्रं संस्कृते लिखत। (4)

**<u>अथवा</u>**

स्वभगिन्याः विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रं संस्कृतभाषायां लिखत।

प्र.23 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायां निबन्धं लिखत – (4)

(1) संस्कृतभाषायाः महत्त्वम्

(2) पर्यावरणम्

(3) छात्रजीवनम्

(4) परोपकारः

---